**<u>भ्वादिगणे शत्रन्तप्रातिपदिकनिर्माणम्</u>**

<u>शत्रन्तप्रातिपदिकस्य निर्माण–प्रक्रिया</u>

शत्रन्तप्रातिपदिकस्य निर्माणार्थं द्वे सोपाने स्तः—
१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्
२. शतृप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–शतृप्रत्यययोः मेलनम्

मनसि धेयम्— सर्वत्र शतृ–प्रत्ययस्य प्रभावेन एव प्रथमसोपानं (शपः विधानम्) भवति | अतः वस्तुतः क्रमः एवम् अस्ति—
वद् + लट् → शतृ–विवक्षायाम् → वद् + शतृ → **तिङ्शित्सार्वधातुकम्, कर्तरि शप्** → वद् + शप् + शतृ | नाम आरम्भतः एव शतृ–प्रत्ययः उपस्थितः; परन्तु द्वितीयसोपाने एव शतृप्रत्यय–निमित्तकम् अङ्गकार्यम्, अतः अग्रे गत्वा सौकर्यार्थं तत्रैव शतृ–प्रत्ययः प्रदर्श्यते |

प्रथमे धातुगणसमूहे (भ्वादौ, दिवादौ, तुदादौ, चुरादौ) धातु–विकरणप्रत्यययोः मेलनेन यत् अङ्गं निष्पन्नं तत् सदा अदन्तम्, अतः शतृप्रत्ययं निमित्तीकृत्य किमपि कार्यं नास्ति | अस्य धातुगणसमूहस्य शन्त्रन्तरूपाणि प्रथमम् अवलोकनीयानि | तदा द्वितीयधातुगणसमूहस्य वीक्षामहे, यत्र शतृप्रत्ययं निमित्तीकृत्य अङ्गकार्यम् अर्हम् |

**<u>भ्वादिगणः</u>** (997 धातवः)

1. <u>सामान्यधातवः</u>
a. येषु धातुषु शपं निमित्तीकृत्य किमपि अङ्गकार्यं नास्ति— केवलं संयोजनम् (754 धातवः)

– इमे सर्वे धातवः न इगन्ताः न वा इगुपधाः अतः किमपि गुणगार्यं नास्ति |
– एषु धातुषु अदुपधधातवः (वद् इव) 237 सन्ति |

वद् + शप् → वद → वद + शतृ → वद + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → वदत्
मील् + शप् → मील → मील + शतृ → मील + अत् → **अतो गुणे** → मीलत्
मूष् + शप् → मूष → मूष + शतृ → मूष + अत् → **अतो गुणे** → मूषत्
ओख् + शप् → ओख → ओख + शतृ → ओख + अत् → **अतो गुणे** → ओखत्
अगि → **इदितो नुम् धातोः** (७.१.५८) → अन्ग् → अङ्ग् → अङ्ग् + शप् → अङ्ग + शतृ → अङ्ग + अत् → **अतो गुणे** → अङ्गत्
कुञ्च् + शप् → कुञ्च → कुञ्च + शतृ → कुञ्च + अत् → **अतो गुणे** → कुञ्चत्
अर्च् + शप् → अर्च → अर्च + शतृ → अर्च + अत् → **अतो गुणे** → अर्चत्
मेध् + शप् → मेध → मेध + शतृ → मेध + अत् → **अतो गुणे** → मेधत्
वेल्ल् + शप् → वेल्ल → वेल्ल + शतृ → वेल्ल + अत् → **अतो गुणे** → वेल्लत्
धाव् + शप् → धाव → धाव + शतृ → धाव + अत् → **अतो गुणे** → धावत्

b. इगन्तधातवः (39 धातवः)
इक् इति प्रत्याहारः | इ, ई, उ, ऊ, ऋ, ॠ येषां धातूनाम् अन्ते, ते इगन्तधातवः | भ्वादिगणीय–इगन्तधातूनां कृते कार्यं सर्वत्र समानम् |

१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्

सर्वेषाम् इगन्तधातूनां गुणकार्यम्—
जि + शप् → **सार्वधातुकार्धधातुकयोः** → जे + अ
भू + शप् → **सार्वधातुकार्धधातुकयोः** → भो + अ
हृ + शप् → **सार्वधातुकार्धधातुकयोः** → हर् + अ

धात्वन्ते इ, ई, उ, ऊ चेत्, तदा यान्तवान्तसन्धिः—

जे + अ → **एचोऽयवायावः** इत्यनेन अय्–आदेशः → ज् + अय् + अ → जय
भो + अ → **एचोऽयवायावः** इत्यनेन अव्–आदेशः → भ् + अव् + अ → भव
ऋकारान्तः चेत्, केवलं वर्णमेलनम्—
हर् + अ → हर

**सार्वधातुकार्धधातुकयोः** (७.३.८४) = इगन्ताङ्गस्य इकः गुणः भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | सार्वधातुकञ्च आर्धधातुकञ्च तयोरितरेतरद्वन्द्वः सार्वधातुकार्धधातुके, तयोः सार्वधातुकार्धधातुकयोः | सार्वधातुकार्धधातुकयोः सप्तम्यन्तम्, एकपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा–सूत्रेण, **इकः** स्थानी भवति यत्र स्थानी नोक्तम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन '**इकः अङ्गस्य**' इत्युक्ते न केवलम् इक् इति अङ्गं, किन्तु तादृशम् अङ्गं यस्य अन्ते इक्; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गस्य स्थाने गुणादेशः इति न, अपि तु अङ्गस्य अन्तिमवर्णस्य स्थाने गुणादेशः | अनुवृत्ति–सहितसूत्रम्— **इकः अङ्गस्य गुणः सार्वधातुकार्धधातुकयोः** |

**एचोऽयवायावः** (६.१.७७) = एचः (ए, ओ, ऐ, औ इत्येषां) स्थाने क्रमेण अय्, अव्, आय्, आव् इत्यादेशाः भवन्ति अचि परे | क्रमेण इत्युक्तं **यथासंख्यमनुदेशः समानाम्** (१.३.१०) इति परिभाषा सूत्रस्य साहाय्येन | अय् च, अव् च, आय् च, आव् च, तेषाम् इतरेतरद्वन्द्वः, अयवायावः | एचः षष्ठ्यन्तम्, अयवायावः प्रथमान्तं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७६) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; **संहितायाम्** (६.१.७१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **एचः अयवायावः अचि संहितायाम्** |

२. शतृप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–शतृप्रत्यययोः मेलनम्

भ्वादिगणे अङ्गं सदा अदन्तम्, अतः अङ्गकार्यं नास्ति | केवलम् **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः |

जि + शप् → जय → जय + शतृ → जय + अत् → **अतो गुणे** → जयत्
नी + शप् → नय → नय + शतृ → नय + अत् → **अतो गुणे** → नयत्
द्रु + शप् → द्रव → द्रव + शतृ → द्रव + अत् → **अतो गुणे** → द्रवत्
भू + शप् → भव → भव + शतृ → भव + अत् → **अतो गुणे** → भवत्
हृ + शप् → हर → हर + शतृ → हर + अत् → **अतो गुणे** → हरत्

c. एजन्तधातवः (31 धातवः)
एते धातवः इगन्ताः न सन्ति अतः गुणस्य प्रसङ्गः न भवति | केवलम् **एचोऽयवायावः** इत्यनेन यान्तवान्तसन्धिः |

धे + शप् → धे + अ → **एचोऽयवायावः** → ध् + अय् + अ → धय → धय + अत् → धयत्
गै + शप् → गै + अ → **एचोऽयवायावः** → ग् + आय् + अ → गाय → गाय + अत् → गायत्
धौ + शप् → धौ + अ → **एचोऽयवायावः** → ध् + आव् + अ → धाव → धाव + अत् → धावत्

d. लघु–इगुपधधातवः (127 धातवः)
उपधा नाम अन्तिमवर्णात् प्राक् यः वर्णः, सः | यस्य धातोः उपधायां लघु इक् (इ, उ, ऋ) अस्ति, सः लघु–इगुपधधातुः | भ्वादिगणीय–इगुपधधातूनां कृते कार्यं सर्वत्र समानम् |

१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्

चित् + शप् → **पुगन्तलघूपधस्य च** → चेत् + अ → चेत
घुष् + शप् → **पुगन्तलघूपधस्य च** → घोष् + अ → घोष
वृष् + शप् → **पुगन्तलघूपधस्य च** → वर्ष् + अ → वर्ष

२. शतृप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–शतृप्रत्यययोः मेलनम्

भ्वादिगणे अङ्गं सदा अदन्तम्, अतः अङ्गकार्यं नास्ति | केवलम् **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः |

चित् + शप् → चेत → चेत + शतृ → चेत + अत् → **अतो गुणे** → चेतत्
घुष् + शप् → घोष → चेत + शतृ → घोष + अत् → **अतो गुणे** → घोषत्
वृष् + शप् → वर्ष → वर्ष + शतृ → वर्ष + अत् → **अतो गुणे** → वर्षत्

**पुगन्तलघूपधस्य च** (७.३.८६) = पुगन्तस्य अङ्गस्य लघूपधस्य च इकः गुणः भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | पुक् अन्ते यस्य तत् पुगन्तम्, लघ्वी उपधा यस्य तत् लघूपधम् | पुगन्तञ्च लघूपधञ्च तयोः पुगन्तलघूपधं समाहारद्वन्द्वः, तस्य पुगन्तलघूपधस्य | पुगन्तलघूपधस्य षष्ठ्यन्तं पदम्, च अव्ययपदं, द्विपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः; **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य पूर्णानुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा-सूत्रेण, **इकः** स्थानी भवति यत्र स्थानी नोक्तम् | अनुवृत्ति-सहितसूत्रम्— **पुगन्तलघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः** |

2. <u>विशेषधातवः</u> (46 धातवः)

भ्वादिगणे केचन धातवः सन्ति येषां विकारः भवति शिति प्रत्यये परे | ते अधः सूचिताः | अयं विकारः धात्वादेशः इत्युच्यते |

a. गम्, यम् धात्वोः छकारादेशः

**इषुगमियमां छः** (७.३.७७) = इष्, गम्, यम् एषां छकारादेशः भवति शिति परे | **अलोन्त्यस्य** (१.१.५२) इत्यनेन छ्-आदेशः अन्तिमवर्णस्य स्थाने न तु पूर्णधातोः स्थाने | इषुश्च गमिश्च यम् च तेषामितरेतरद्वन्द्वः इषुगमियमः, तेषाम् इषुगमियमाम् | इषुगमियमां षष्ठ्यन्तं, छः प्रथमान्तं, द्विपदमिदं सूत्रम् | **छिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **इषुगमियमाम् अङ्गस्य छः शिति** |

गम् → गच्छ् → गच्छति | यम् → यच्छ् → यच्छति | केवलं शिति परे इति धेयम् | अतः गच्छति परन्तु गमिष्यति, यच्छति परन्तु यमिष्यति इति | इष्-धातुः (इच्छति) तुदादिगणे वर्तते अतः तस्य सूचना अत्र न दीयते |

गम् + शप् → **इषुगमियमां छः**, **अलोन्त्यस्य** इत्याभ्यं म्-स्थाने छ् → गछ् + अ → **छे च** (६.१.७३) इत्यनेन छकारे परे संहितायां विषये ह्रस्वस्य स्वरस्य तुक्-आगमो भवति | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन गकारोत्तरवर्ती-अकारस्य अनन्तरं (न तु पूर्वम्) | गछ् + अ → गत्छ् + अ → **स्तोः श्चुना श्चुः** (८.४.४०) इत्यनेन सकारस्य तवर्गीयस्य च स्थाने शकारस्य चवर्गस्य च आदेशः भवति, शकारस्य चवर्गस्य च योजनेन | गछ् → गत्छ् → गच्छ् + अ → गच्छ |

गच्छ् + शप् → गच्छ → गच्छ + अत् → **अतो गुणे** → गच्छत्
यच्छ् + शप् → यच्छ → यच्छ + अत् → **अतो गुणे** → यच्छत्

b. पा-आदिधातूनां धात्वादेशः

**पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदां, पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः** (७.३.७८) = पा घ्रा ध्मा इत्यादीनां स्थाने पिब, जिघ्र, धम एते आदेशाः भवन्ति शिति परे | केवलं शिति परे इति धेयम् | अतः पिबति परन्तु पास्यति इति | पाश्च घ्राश्च ध्माश्च ... सद् च तेषामितरेतरद्वन्द्वः पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदः, तेषां पा-घ्रा-ध्मा-स्था-स्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदाम् | पिबश्च जिघ्रश्च धमश्च ... सीदश्च तेषामितरेतरद्वन्द्वः पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः | पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदाम् षष्ठ्यन्तं, पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः प्रथमान्तं, द्विपदमिदं सूत्रम् | **छिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदां अङ्गस्य पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः शिति** |

पा + शप् → पिब + अ → **अतो गुणे** → पिब → पिब + अत् → **अतो गुणे** → पिबत्
घ्रा + शप् → जिघ्र + अ → **अतो गुणे** → जिघ्र → जिघ्र + अत् → **अतो गुणे** → जिघ्रत्
ध्मा + शप् → धम + अ → **अतो गुणे** → धम → धम + अत् → **अतो गुणे** → धमत्
स्था + शप् → तिष्ठ + अ → **अतो गुणे** → तिष्ठ → तिष्ठ + अत् → **अतो गुणे** → तिष्ठत्
म्ना + शप् → मन + अ → **अतो गुणे** → मन → मन + अत् → **अतो गुणे** → मनत्
दाण् + शप् → यच्छ + अ → **अतो गुणे** → यच्छ → यच्छ + अत् → **अतो गुणे** → यच्छत्
दृश् + शप् → पश्य + अ → **अतो गुणे** → पश्य → पश्य + अत् → **अतो गुणे** → पश्यत्
ऋ + शप् → ऋच्छ + अ → **अतो गुणे** → ऋच्छ → ऋच्छ + अत् → **अतो गुणे** → ऋच्छत्
सृ + शप् → धौ + अ → धाव → धाव + अत् → **अतो गुणे** → धावत्
शद् + शप् → शीय + अ → **अतो गुणे** → शीय → शीय + शानच् → शीय + आन → **आने मुक्** (७.२.८२) इत्यनेन आने परे अदन्ताङ्गस्य मुक्–आगमः → शीय + मान → शीयमान |
सद् + शप् → सीद + अ → **अतो गुणे** → सीद → सीद + अत् → **अतो गुणे** → सीदत्

धेयं यत् सृ–धातोः स्थाने धौ–आदेशः भवति तदा यदा 'to run' इत्यर्थे अस्ति, न तु 'to go, to flow' इत्यर्थे |

c. दंश्, सञ्ज्, स्वञ्ज्, रञ्ज् इत्येषां न–लोपः—

**दंशसञ्जस्वञ्जां शपि** (६.४.२५) = दंश्, सञ्ज्, स्वञ्ज्, एतेषां नकारस्य लोपः भवति शपि परे |
उदा––
दंश् + शप् → दश → दश + अत् → **अतो गुणे** → दशत्
सञ्ज् + शप् → सज → सज + अत् → **अतो गुणे** → सजत्
स्वञ्ज् आत्मनेपदिधातुः अतः तस्य शानच् भवति |

**रञ्जेश्च** (६.४.२६) = रञ्ज्–धातोः अपि नकारस्य लोपः भवति शपि परे |
रञ्ज् + शप् → रज → रज + अत् → **अतो गुणे** → रजत्

भ्वादिगणे केषाञ्चित् धातूनां विकरणप्रत्यय–विकल्पः— कुत्रचित् विकल्पेन श (तुदादिः), कुत्रचित् विकल्पेन श्नु (स्वादिः), कुत्रचित् विकल्पेन उ (तनादिः), कुत्रचित् द्वित्वं (सनन्तः इव), कुत्रचित् अय (चुरादिः इव), कुत्रचित् विकल्पेन श्यन् (दिवादिः) | सूत्राणि दीक्षितपुष्पायाः धातुपाठपुस्तके pp. १५ –१८ |

इति भ्वादिगणे समग्रं शत्रन्तप्रातिपदिकचिन्तनं समाप्तम् |

Swarup — Oct 2014